पितृतर्पणम् । पिण्डदानं ततः शस्तं पितृणाञ्चातिदुर्लभम् । विलम्बो नैव कर्त्तव्यो न च विघ्नं समाचरेत् । श्राद्धं तत्र तु कर्त्तव्यमर्घ्यावाहनवर्जितम् । श्वध्वाङ्क्षगृध्रकाकानां नैव दृष्टिहतञ्च यत्"। ध्वाङ्क्षोद्रोणकाकः । अत्राकाल इति न रात्र्यादाविति पर्य्युदस्तप्रतिप्रसवः । तथात्वे तद्बाधापत्तेः । किन्तु पर्य्युदस्तेतराप्रशस्तकालपरम् । "तत् सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः"इत्यनुसारात् । काल इति प्रशस्तापराह्णादिकालपरम् । अत्र शुचेः प्राप्त्युत्तरविहितप्रथमदिन एव श्राद्धं तेन पूर्वदिने राक्षसीवेलादावागमनेऽपि परदिने श्राद्धमविरुद्धम् । तथा च हलायुधधृतम् "गत्वैव तीर्थं कर्त्तव्यं श्राद्धं तत्प्राप्तिहेतुकम् । पूर्वाह्णेऽप्यथ वा प्रातर्दर्शे स्यात् पूर्वदक्षिणे" । पूर्वाह्णे सङ्गवे पूर्वदक्षिणे अग्निकोणे । पिण्डदानमिति श्राद्धासम्भवे केवलपिण्डदानमिति न पौनरुक्त्यम् । तीर्थे पिण्डप्रतिपत्तिमाह मत्स्यपुराणम् "पिण्डांस्तु गोऽजविप्रेभ्योदद्यादग्नौ जलेऽपि वा । तीर्थश्राद्धे सदा पिण्डान् क्षिपेत्तीर्थे विचक्षणः" ।

वायुपु० "उद्यतश्चेद्गयां गन्तुं श्राद्धं कृत्वा विधानतः । विधाय कर्पटीवेशं कृत्वा ग्रामं प्रदक्षिणम् । ततो ग्रामान्तरं गत्वा श्राद्धशेषस्य भोजनम्" इत्युक्तं गयामित्युपलक्षणादन्यत्रापि तथा । अन्यत् मत्कृतगयाश्राद्धादिपद्धतौ दृश्यम् ।

कूर्मपुराणम् "ऐश्वर्य्यलोभमाहात्म्यात् गच्छेद्यानेन यो नरः । निष्फलं तस्य तत्तीर्थं तस्माद्यानं विवर्जयेत्"इति मत्स्यपुराणम् "संवत्सरं द्विमासोनं पुनस्तीर्थं व्रजेद्यदि । मुण्डनञ्चोपवासञ्च तदा यत्नेन कारयेत्" इति गङ्गावाक्याव० । तीर्थप्राप्त्यनन्तरविधानं यथा ।

"न परीक्ष्यो द्विजस्तीर्थेष्वन्नार्थी भोज्य एव हि । सक्तुभिः पिण्डदानञ्च चरुणा पायसेन च । कर्त्तव्यमृषिभिर्दिष्टं पिण्याकेन गुड़ेन च । श्राद्धं तत्र तु कर्त्तव्यमर्घ्यावाहनवर्जितम् । अकालेऽप्यथवा काले तीर्थश्राद्धन्तु तर्पणम् । अविलम्बेन कर्त्तव्यं नैव विघ्नं समाचरेत् । यदह्नि तीर्थप्राप्तिः स्यात्ततोऽह्नः पूर्ववासरे । उपवासश्च कर्त्तव्यः प्राप्तेऽह्नि श्राद्धदो भवेत् । तीर्थोपवासः कर्त्तव्यः शिरसो मुण्डनं तथा । शिरोगतानि पापानि यान्ति मुण्डनतो यतः । तीर्थं प्राप्य प्रसङ्गेन स्नानं तीर्थे समाचरेत् । स्नानजं फलमाप्नोति तीर्थयात्राश्रितं न तु" इति काशीखण्डम् । "मुण्डनञ्चोपवासश्च सर्वतीर्थेष्वयं विधिः । वर्जयित्वा गयां गङ्गां विशालां विरजान्तथा" इति स्कान्दम् "स्नापयेत् स्निग्धमित्रादीन् ज्ञातीं स्तीर्थे नरोत्तमः । अन्यथापहरन्त्येते बलात्तीर्थभवं फलम्" इति स्कान्दम् "मातरं पितरं जायां भ्रातरं सुहृदं गुरुम् । यमुद्दिश्य निमज्जेत अष्टभागं लभेत सः" इति प्रा०त०मार्क०पु० ।

कलौ तीर्थानां पृथिव्यां स्थितिकालो यथा "सरस्वती पुण्यक्षेत्रमाजगाम च भारतम् । गङ्गाशापेन कलया स्वयं तस्थौ हरेः पदे । पश्चाद्भगीरथानीतामहीं भागीरथी शुभा । समाजगाम कलया वाणी शापेन नारद ! । पद्मा जगाम कलया सा च पद्मावती नदी । भारतं भारतीशापात् स्वयं तस्थौ हरेः पदे । कलेः पञ्चसहस्रञ्च वर्षान् स्थित्वा च भारते । जग्मुस्ताश्च सरिद्रूपं विहाय श्रीहरेः पदम् । यानि सर्वाणि तीर्थानि काशीं वृन्दावनं विना । यास्यन्ति ताभिः सार्द्धञ्च वैकुण्ठमाज्ञया हरेः" ।

"यानादिना गमनदोषो यथा "पुण्यार्द्धं हरते याने तदर्द्धं तत्र पादुके । तदर्द्धं तैलमांसाभ्यां सर्वं हरति मैथुने" इति कर्म्मलोचनम् ।

तत्र उपाये घट्टे च "कृततीर्थः पयसामिवाशयः" किरा० शास्त्रे तीर्थकरः । पात्रे । "ब्रह्मचारी धनदायी मेधावी श्रोत्रियः प्रियः । विद्यया विद्यां यः प्राह तानि तीर्थानि षण्मम" विद्यावाक्यम् । १८चात्वालोत्करयोरन्तराले देशे "दक्षिणेनाहृत्य तीर्थेन पूर्वेण वेदिमपरेण वा" कात्या०श्रौ० ५।५।११ । "तीर्थेन चात्वालोत्करावन्तरेण प्रवेश्य वेदिचात्वालयोरन्तरालेन पूर्वेणोत्तरवेदिं दक्षिणेनाग्नेः पुरस्तादाहृत्य अथवा तीर्थेन प्रवेशनानन्तरमुत्तरां वेदिमपरेण चानीय वेद्योरन्तरालेन दक्षिणस्याग्नेः पुरस्तादानीय जुहोति" "तेनान्तरेण प्रतिपद्यन्ते चात्वालं चैतद्वै देवानां तीर्थम्"षड्विं०ब्रा० । कराङ्गुलितलेषु ब्राह्मादितीर्थता यथाह मनुः "ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् । कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन । अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते । कायमङ्गुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः" शास्त्रानुज्ञाविषये । "अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्यः"छा०उ०"तीर्थं शास्त्रानुज्ञाविषयः" भाष्यम् । १९मन्त्र्याद्यष्टादशसु । "कच्चिदष्टादशान्येषु स्वपक्षे दश पञ्च च । त्रिभिस्त्रिभिर-